National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 402-405
© 2026 NJHSR
www.sanskritarticle.com

**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

**Correspondence:**
**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

# जातिस्वरूपविमर्शः

**प्रो. प्रभाकरप्रसादः**

मीमांसकैः वेदान्तिभिश्च जातिरेव शब्दार्थः इति स्वीक्रियते।। तथा हि- सर्वेष्वपि वस्तुषु **"इयमपि गौरियमपि गौ; अयमपि वृक्षोऽयमपि वृक्षः"** इति व्यावृत्तानुवृत्ताकारं प्रत्यक्षं देशकालावस्थान्तरेष्व-विपर्यस्तमुदीयमानं सर्वमेव तर्काभासं विजित्य द्व्याकारं वस्तु व्यवस्थापयन्, केनान्येन बाध्यते, न हि ततोऽन्यद्बलवत्तरमस्ति प्रमाणम्, तन्मूलत्वात् प्रमाणान्तराणां तद्बाधसामर्थ्याभावात् । तदुक्तम्-

**प्रत्यक्षबलसिद्धस्य सामान्यस्य कुतर्कतः।**
**न शक्योऽपह्नवः कर्तुं सर्वं विजयते हि तत् ॥**[1]

यदत्राक्षिप्तं सामान्यं मूर्त वामूर्तं वेति, तत्रोच्यते सामान्यममूर्तमिति। तच्च सर्वसर्वगतं व्यक्तिसर्वगतं चेत्युभयथापि निरूपणं सुघटम्। सर्वसर्वगतमिति पक्षे सर्वगतं सामान्यं नाकाशवत् सर्वसंयुक्तम्, नापि सत्तावद् गोत्वाद्यपि सर्वसमवेतम्, किन्तु सन्निधिमात्रेण सर्वत्रास्तीति अभिप्रेतम्, यथा काले रूपम्। यथा च रूपे सत्त्वेऽपि काले, काले रूपवान् इति प्रतीतिर्न भवति, न वा व्यवहारः तथा सामान्यं व्यापकमपि पिण्डानामन्तराले न प्रतीयते न वा तत्र सामान्यस्तीति व्यवहारो भवति। तस्य समवायेनाधारो व्यञ्जक; तस्मात् सर्वत्र विद्यमानमपि यत्रैव समवेतं तत्रैवाभिव्यक्तं दृश्यते। न हि आधारतत्सम्बन्धग्रहणा-धीनत्वेनाग्रहणे अत्रेदमिति प्रत्ययो क्वपि दृष्टचरः। तस्मात् जातिसंकरोऽपि न, यद्यपि सर्वत्रोपलभ्यते सामान्यन्तथापि व्यक्त्यन्तरालादेस्तदाधारवद् व्यञ्जकत्वं नास्ति तत्रोपलब्ध्यभिमानो न भवतीत्यङ्गीकारात् ।

यत् पुनरेतद् **"व्यञ्जकाप्रतिपत्तौ ही"** त्यादिना दूषणं दत्तम्, तन्नोपपद्यते । यतः नायं नियमः- व्यञ्जकप्रतीतिपूर्विकैव व्यङ्ग्यप्रतीतिरिति, अपि तु विशेषण-प्रतीतिपूर्विकैव विशेष्यप्रतीतिरित्ययं नियमः । ततश्च घटाद्यर्थोऽपि प्रकाशादिविशेषणं यदि स्यात्ततः प्रागेव गृह्येत । विशेषणविशेष्यत्वाभावे तु व्यक्तिजात्योरप्यनियमेन यौगपद्येन वा ग्रहणं न दोषाय। न च स्वप्रतिपत्या परप्रतिपत्तिहेतुर्व्यञ्जक इति व्यञ्जकलक्षणमिष्यतेः इन्द्रियादेरप्रतीतस्यापि व्यञ्जकत्वात्। तस्मात् सदेव वस्तु यद्वैकलयाद-नुपलभ्यमासीत्तत्तस्य व्यञ्जकमिति स्वीकार्यम्। न च जातिविकला व्यक्तिः कदाचिदासीद्येन जातिरेव व्यक्तिव्यञ्जिका स्यादिति न दोषः।

व्यक्तिसर्वगतं सामान्यमिति स्वीकारेऽपि न दोषः। यत्पुनरत्र **"अन्यत्र वर्तमानस्येत्यादिना"** दूषणानि दर्शितानि, तत्रोच्यते- विचित्रा हि पदार्थानां शक्तिस्तेन सामान्यस्यैवेदृशी शक्तिः, यया हेतुविशेषैरुत्पद्यमानेऽर्थे पूर्वस्थानादचलदेव सम्बद्ध्यत इति स्वीक्रियते, चलने हि पूर्वस्थानं तच्छून्यं स्यात् । नैतदद्भुतं पदार्थस्वभाववैचित्र्यादेव, यथा मन्त्रादिसंस्कृतमस्त्रं व्याधिविशेषमुदरस्थं छिनत्ति, नोदरम् सूत्रादिकं चौषधिसंस्कृतं नाग्निर्दहति किन्तु तदुपरि भाजनस्थं तण्डुलं पचति, तथा सामान्यमपीदृक् शक्तिमत्। प्रमाणेन सामान्यसिद्धेः पूर्वदर्शितत्वात् प्रमाणसिद्धस्य वस्तुस्वभावस्य चोपहासमात्रेण च त्यक्तुमशक्यत्वात्। अपोहोऽप्येवमेव विचित्रस्वभाववानिति चेद्, अस्तु तद्यदि भावरूपं चेत् नास्माकं कलह; नामान्तरन्तत् सामान्यस्य स्यात्। अपोहो यद्यवस्तु चेन्न सह्यमस्माकम्,

यतः तस्मात्तद्भावरूपमित्येव अनुवृत्तव्यवहारकारणत्वमवस्तुनोऽनुपपन्नम्, प्रतीतिशरणैरकामैरप्यङ्गी- कार्यम्।

यत्तु पृष्टं सामान्यं नित्यं वानित्यं वेति? तत्रोच्यते सामान्यं नित्यमेव। महाप्रलये क्व तिष्ठतीति चेत्? न क्वचित्। ननु किं विनष्टम्, न, तस्य नित्यत्वात्। नित्यं विद्यमानं न क्वचिदस्तीति कैषा वाचोयुक्तिः? तदा निराधारमेवास्तीति एषा वाचोयुक्तिः भूतभाव्याधारपेक्षया तु तदापि सामान्यमुच्यते । चाव्यपदिश्यमानमसदेव भवति। यथा आकाशादय निराधाराः सन्ति तथैव सामान्यमपि महाप्रलये तिष्ठतीत्यत्र को दोषः। न ननु व्यक्तिसर्वगतं सामान्यमित्यत्र पक्षे महाप्रलये पिण्डव्यक्तीनां विनाशात् सामान्यं क्व तिष्ठति ? आधारं विनाप्याधेयं तिष्ठतीति चेत्तदा रूपादयोऽपि तथैव नित्याः स्युरिति चेत् सत्यम्, तादृश महाप्रलय एव नास्ति । यतः नात्र प्रत्यक्षं प्रमाणम्, नाप्यनुमानं प्रमाणम् । ननु पुराणादिषु प्रलयो महाप्रलयश्च श्रूयते चेत्, सत्यम्, तत्र लोकत्रयविनाशः प्रलय; सहाण्डेन चतुर्दशस्थानविनाशो महाप्रलय इति श्रुतम्, न तु तत्र सकलब्रह्माण्डप्रलयो युगपदिति श्रुतिम्। तदभ्युपगमे च निखिलक्रियोपरमात् “रात्री च तावती चैव” इति विरुध्यते, न खलु क्रियाकलापपरिहारेण कालः परिमातुं शक्येतेति। अतः सकलब्रह्माण्डानां युगपत्प्रलये प्रमाणाभावात् महाप्रलये एकब्रह्माण्डनाशे ब्रह्माण्डान्तरपरिवर्तिघटादिसमवेतं घटत्वादिसामान्यं भविष्यतीति न दोषः। कुतः पुनरविनाशि सामान्यमित्यधिगन्तव्यम्? उच्यते-सामान्यमविनाशि वस्तुत्वे सत्यकार्यत्वात्, आकाशवत्। न खलु सामान्यं कार्यमिति साम्प्रतम् । स्वरूपव्याघातपत्तेः। तस्य हि कार्यत्वे व्यक्तिरेव समवायिकारणं स्यात्, तथा सति व्यक्त्युत्पादविनाशयोः सामान्यस्याप्युत्पाद-विनाशप्रसङ्गे प्रतिव्यक्ति सामान्यरूपतां जह्यात्। अभेदे पुनः व्यक्तेः पूर्वमपि सत्वादतत्कारणतापत्तिः। तथा पूर्वपूर्वतमादिव्यक्तिभ्योऽपि प्राक्त्वादकार्यमेव सामान्यमभ्युपेयम्। तस्मात् विपर्ययबाधप्रसङ्ग-सहकारिणा सामान्यस्य रूपग्राहकेण प्रत्यक्षेणाकार्यत्वसिद्धिरिति युक्तं पश्यामः। तत्सिद्धमकार्यत्वादविनाशि सामान्यमिति। यदत्र पुनः आक्षिप्तम्- किं च यदि व्यक्तयः स्वभावेनैव समानाः इत्यादिना, कथमन्यथा तदसमञ्जसम्, सर्वथा सामान्याभावे समानप्रत्यय इत्येव निर्वक्तुमशक्यत्वात् । यदि हि प्रत्येतव्यगतं प्रत्ययगतं वा सामान्यं न भवेत्तदा किमिदं समानप्रत्ययत्वं नाम? संविदारूढः समानाकारः तस्य चार्थधर्मत्वेन बहुमुखप्रतिभासानुसारात् सेत्स्यति। मलयाचलमेखलास्थलीषु चन्दनचम्पकपुन्नागनागकेसरादितरुभेदान-नुभूय सुरङ्गिणीतीररुहः पुनरपि तरूननुभवतः त एवामी तरव इति हि प्रत्यभिज्ञानमञ्जसा अवकल्पेत। समारोपितश्चेन्न बाह्यसामान्यं विना समारोपा सम्भवात्। प्रतिभासानुसारात् बाह्यसामान्य-स्वीकरणमेवोचितम्। एतेनेदमपि परास्तं यदाक्षिप्तं सामान्यादौ सामान्यमस्ति वा न वा? आद्येऽनवस्था, द्वितीये सामान्यादौ यथा सामान्यं विना संव्यवहारानुवृत्तिस्तद्वदेव घटपटादिष्वपि भवतु किं सामान्येन कृत्यमिति। यतः सत्तादावनवस्थादिभिया सामान्याध्या-रोपनिबन्धने-वानुवृत्तप्रत्ययः सम्भवति, सर्वथाा सामान्याभावे कस्य वाध्यारोप इति नाध्यारोपनिबन्धेन संव्यवहारानुवृत्तिः सेत्स्यति । सामान्यादावपि **"सत् सामान्यं, विशेषः सन्"** इत्यादि प्रतीतिबलाद् सत्ता सामान्यादावपि वर्तते इति कौमारिलैः स्वीक्रियते । तन्मतेऽपि नानवस्था, द्रव्यत्वे द्रव्यत्वान्तरं, गोत्वे गोत्वान्तरमस्ती चेदनवस्था स्यात् किन्तु सत्वं (सत्तासामान्यं) द्रव्यत्वादावस्तीति स्वीक्रियते चेत् क्वानवस्थाप्रसङ्ग इति न दोषः ।

यदत्र बौद्धैर्दूषितम् - नीलो घट इति सामान्यविशेषौ पृथग् वस्तुनी न वेत्यादिना निरूपणासहत्वात् सामान्यमवस्तु, यद्वस्तुनो भेदाभेदा-भ्यामवाच्यं तत्सर्वं वस्तु न भवति यथा व्योमकमलमिति। तत्र समाधिः नैयायिकानां प्रदर्श्यते व्यक्तिभ्यः सामान्यस्य भेदेनैव निर्वचनं सम्भवति तथा हि- सामान्यं व्यावर्तमानप्रतिभासेभ्यो भिन्नमेवा-नुवृत्तप्रतिभासमवसीयते मणिकुसुमादिभ्यः सूत्रवत्। सूत्रस्य तु मण्यादौ संयोगरूपा वृत्ति; सामान्यस्य तु व्यक्तिषु समवायरूपा वृत्तिः। एतावतैवान्तरालिकं प्रतिभासवैषम्यम्। न च तथा प्रतिभाससिद्धा भावाः पदार्थान्तरप्रतिभासात् किंचिदेव वैषम्यमु-पादाय शक्यापलापाः। सामान्यविशेषयोः भवति च परस्पर परिहारेणोपलम्भः जातिभेदानुपलम्भेऽपि दूरे पिण्डप्रतीतेः। पिण्डप्रतिभासमन्तरेणापि पिण्डान्तरे सामान्यप्रतीतेः। सूत्रन्तु मणिमात्रमन्तरेणापि प्रतीयते, सामान्यन्तु पुनरविशेषं न जात्वव-भासत इत्येतदपि वस्तुस्वभाववैचित्र्यादुपपन्नम्। भेदः पुनः सामान्य-विशेषयोः व्यावृन्यनुवृत्ति भ्यामवश्यमाश्रयणीयः। भेदाविशेषेऽपि च किंचिदेव कासाञ्चिद्व्यक्तीनां सामान्यं समानप्रत्ययहेतुभावात् कार्यकारणस्वभावनियमवन्नियमो नानुपपन्नः। न सर्वासामित्यपि प्रमाणनुसारिणी वस्तुस्वभावस्यावश्याश्रयणीयत्वात्। ततश्चैतदप्य-पास्तं यद्यस्मादर्थान्तरं न तत्तस्य सामान्यं यथा गोरश्वः अर्थान्तरं च गोगोंत्वमिति, यतः किंचित् साधर्म्यात् प्रत्ययपथवर्तिनोऽपि स्वभावभेदस्यापलापाय प्रत्यवस्थाने कार्यकारणनियमस्यपि अर्थान्तरसाम्यमुपादाय कर भरासभादिवदपलापप्रसङ्गगात्। तदुक्तं न्यायसारे-

> **एवं व्यक्तिविभेदेन शक्यनिर्वचनं यतः।**
> **सामान्यं तदसिद्धत्वमितिहेतोर्व्यवास्थितम्।**
> **तस्मात् बाधकवैधुर्यात् सामान्ये सत्यता स्थिता ।। इति ।।**[2]

मीमांसकाः भाट्टा पुनः व्यक्तिसामान्ययोर्भेदाभेदमाश्रित्य समाददति। तथा हि अस्ति च शाबलेयबाहुलेयावुपलभमानस्य **“अयं गौरयमपि गौः”** इत्यभेदावभासः। अन्यः बाहुलेयः शाबलेयादिति च भेदावभासः। केवलभेदेन वा केवलाभेदेन वा प्रतीतिद्वयस्य समर्थनमशक्यम्। तस्मात् प्रतीतिशरणैः प्रमाणबलेन भेदाभेदत्वमेवा-श्रयणीयम्। ननु विरुद्धौ समसत्ताकभेदाभेदौ कथमेकत्र स्यातामिति चेत्। उच्यते न विरोधः सहदर्शनादिति, ज्ञायते हि यत्र परस्परोपमर्दन प्रतीतिद्वयं यथा इदं नेदं रजतमिति तत्रैव विरोधात् मिथ्या प्रतीतिरेकेति । अत्र तु न भेदाभेदयोः परस्परोपमर्दन प्रतीतिरिति, न हि इयं गौरिति अभेदमापादयता सामानाधिकरण्येन भेदो वार्यते, मृद्घटयोर्भिन्नार्थक्रियाकारकत्वाद्भेदे सत्वेऽपि मृद्घट इति

सामानाधिकरण्यदर्शनात्। तस्माद् "इयं गौरिति" बुद्धिद्वयमपर्यायेण प्रतिभासमानमेकं वस्तु द्वयात्मकं व्यवस्थापयति सामानाधिकरण्यम-भेदमापादयति, अपर्यायत्वं च भेदमिति समसत्ताकभेदाभेदौ न विरुध्यते । अपि च धर्मेणैकेन भेद; धर्मान्तिरेण चाभेद इति अपेक्षाभेदान्न दोषः। गोत्वं हि शाबलेयात्मना बाहुलेयाद्भिद्यते स्वरूपेण च न भिद्यते तथा व्यक्तिरपि गुणकर्मजात्यन्तरात्मना गोत्वाद्भिद्यते स्वरूपेण च न भिद्यते। तदुक्तं भट्टाचार्यैः-

**एवं च परिहर्तव्या भिन्नाभिन्नत्वकल्पना।**

**केनचिच्चात्मनैकत्वं नानात्वं चास्य केनचित् ।। इति ।।**[3]

कथं नन्वनुवृत्ता नित्यानुत्पत्तिविनाशधर्मा च जातिः विपरीतस्वभावा च व्यक्तिः, तयोरेक्यम्, न ह्येकमेव वस्तु नित्यमनित्यमुत्पत्ति-विनाशधर्मकं व्यावृत्तमनुवृत्तं च च सम्भवति त्रैलोक्यसंकरप्रसङ्गात् जातिरप्येवमनित्यत्वदि धर्मयुक्ता स्यात्, व्यक्तिरपि नित्यत्वादिधर्म-युक्ता स्यादिति चेत्। नैष दोषः, नानाकारं हि तद्वस्तु केनचिदाकारेण नित्यत्वादिकं केनाच्विनित्यत्वादिकं बिभन्न विरोत्स्यते। जातिरपि व्यक्तिरूपेणानित्या व्यक्तिरपि जात्यात्मना नित्येति नात्र काचिदनिष्टापत्तिः। एवं च जातिवादे समारोपितसकलशङ्का-पङ्कप्रक्षालनमकारि। एतदतिरिक्तसम्भावितशापङ्क प्रक्षालनन्तु जातिसाधकप्रत्यक्षप्रमाणशरणैः **"न हि दृष्टे किंचिदनुपपन्नं नाम"** इति सूक्तिधारयैव कर्तुं सुलभम् । एतावता नैयायिकादीनां सरणिमाश्रित्य जाति-स्वरूपनिरूपणं सुघटमतः विधिरेव शब्दार्थः नापोहवादिभिः स्वकपोलकल्पिमपोहादिकमिति सुनिरूपितम् ।

**वेदान्तिनां मते जातिस्वरूपविचारः-**

इदानीमवसरसङ्गत्या वेदान्तमते जातिः स्वीकृता न वेति विचार्यते। जातीनां सद्रूपत्वमविद्याशक्तिविशेषरूपत्वं वेति पक्षद्वयं वेदान्ति-भिरुक्तम्। तत्र प्रथमः पक्षः मण्डनमिश्रादिभिराश्रितः शाब्दनिर्णयदीपिकाकारैः श्रीमदानबोधाचार्यैश्च स्वीकृतः पर्वमेव भूमिकायां प्रत्यपादि। नन्वत्र प्रथमपक्षे एकमेव सत् कथं घटत्वादिनानाजातिरूपं स्यादिति चेत्। नैषः दोष; सदेव घटाद्युपहितं द्रव्यत्वादि, द्रव्यादित्रयोपहितं घटत्वादिसामान्यम्, द्रव्याद्युपहितं सत्तासामान्यमितिरीत्या एकस्यापि उपाधिभेदादभेदोपपत्तेः। यथा तार्किकादीनां मते गौरित्याकारकव्यवहारे गोत्वादिकारणं तथैव वेदान्तिमते गोत्वजातिमत्वेन पराभिमताः यावत्यो व्यक्तयस्तावदन्य-तमोपरक्तसद्रूपं गौरित्याकारकव्यवहारे कारणमित्यङ्गीक्रियते। नन्वेवंगवादिपदानां तत्तद्व्यक्तिविशिष्टसद्रूपे सद्रूपविशिष्टतत्तद् व्यक्तिषु वा शक्तिर्वाच्या, तथा च तेषां नानार्थकत्वापत्ति; एवं शक्तिग्रहनिष्ठकारणत्वादिकमपि तत्तद्व्यक्तिघटितावच्छेकभेदेनानन्तं स्यादिति चेत्। न, सर्वगोव्यक्तिषु एकस्या एव शक्तेः सम्भवेन नानार्थकत्वाभावात् । तथा हि- गोपदे तावदव्यक्तिधीजननानुकूला शक्तिरेका स्वीक्रियते। सा चाखण्डकारणतारूपा, उक्तधी निष्ठा कार्यताप्यखण्डा, तयोश्चावच्छिनत्वे मानाभावात् तदीयाखण्डा-वच्छेदकताश्रयः न कोऽपि धर्मोऽपेक्षते। शक्तिग्रह-निष्ठकारणत्वमपि नानन्तं किन्त्वेकमेव **"सद्रूपविशिष्ट-तद्व्यक्तिरिति"** शाब्दबोधं प्रति सद्रूपविशिष्टतद्व्यक्तिशक्तं गोपदमित्याकारकेषु एकस्या एवानवच्छि-न्नायाः कारणतायाः स्वीकारात् गोत्वजात्याश्रयत्वेन तार्किकाद्यभि-मतव्यक्तीनामन्यतमस्यैव तद्व्यक्तिशब्देन कार्यकारणकोट्योर्निवेशात्। अत एव घटव्यक्तिं तद्व्यक्तित्वेनावगाहमानादुक्ताकारकशक्तिज्ञानान् न गोव्यक्तीनां बोधः तत्र कारणत्वस्यास्वीकारात्। ननु कारणत्वा-देरखण्डत्वस्वीकारेऽपि अन्वयव्यतिरेकज्ञानस्यैव तग्राहकत्वं वाच्यम्, तच्च नानुगतैकरूपं विनेति तादृशं गोत्वमवश्यं स्वीकार्यमिति चेत्, न, तृणारणिमण्यादिस्थल इवोपस्थितानां त्रिचतुरादिव्यक्तीनां प्रत्येकान्वयव्यतिरेकज्ञानेन कारणता तास्वेव प्रथमतो गृह्यते, पश्चाद्व्यक्त्यन्तरादपि कार्योत्पत्तिदर्शनात् तत्रापि तस्याः सम्बन्धो-ऽस्तीति कल्प्यते, न तु सर्वकारणव्यक्तीनामन्वयव्यतिरेकधीस्त-द्याहिका। न हि तृणारणिमणिभ्य एव वह्निरुत्पद्यते इति नियन्तुं शक्यम्, तैलघृतमांसवसादिभ्योऽपि वह्युत्पत्तेर्दर्शनात्। न च तावतां प्रथममुपस्थितिरस्ति, येन प्रथमत एव प्रत्येकमन्वयव्य-तिरेकधीसंभवः। न च कारणत्वादेरवच्छिन्नत्वेनैवानुभव इति वाच्यम्, धूमो वह्निव्याप्य इत्याद्यनुभवे धूमत्वादौ व्याप्यतावच्छेदकाभानस्य दीधितिकाराद्युक्तत्वेन तद्वदेव दण्डो घटकारणमित्याद्यनुभवे दण्डत्वादेः कारणतावच्छेदकत्वाभानात्। एवं च सद्रूपत्वमेव जातीनामिति मते न काप्यनुपपत्तिः। तदुक्तं वेदान्तकल्पलति-कायामाचार्यमधुसूदनस्वामिभिः **"वेदान्तिभिः सद्रूपस्यात्मनः सर्वता-दात्म्यापन्नस्यैव किंचिद्विशिष्टस्य तत्तत्सामान्यरूपत्वस्वीकाराद्"** इति। अयं वेदान्ते विशेषः परस्परं भिद्यामानेषु प्रतिघटं येयं घटो यं घटोऽयमित्येकाकारा प्रतीतिरुदेति सानुगतप्रतीतिरित्यभिधीयते। तस्याश्च प्रतीतेर्विषयो न घटः घटानां परस्परं भेदाद् घटपटादिज्ञानवत् तज् ज्ञानानामप्याकार भेदापातात्, विषयभेदस्यैव ज्ञाना कारभेदकत्वात्।[4] न चात्राकार भेदस्तस्मात् ततप्रतीतेर्विषयः कश्चिद् घटगणानुगतो धर्मो वक्तव्यः । योऽयं सकलघटानुगतो धर्मः तद घटत्वम् । तदेव घटत्वजातिरिति नैयायिकैः स्वीक्रियते। येनेन्द्रेयेण या व्यक्तिः गृह्यते तेनेन्द्रियेण तन्निष्ठा जातिः तदभावश्च गृह्यत इति न्यायात् तस्याः प्रत्यक्षविषयत्वं स्वीक्रियते जातिनिष्ठलौकिक-विषयतासम्बन्धेन प्रत्यक्षं प्रति स्वविषयसमवेतत्वसम्बन्चेन प्रत्यक्षं कारणमिति कार्यकारणभावः। तत्र च जातिप्रत्यक्षप्रयोजक-स्योक्तसम्बन्धस्य घटकतया व्यक्तीनां जातिप्रत्यक्षं प्रयोजकत्वात्, व्यक्तीनां जातिव्यञ्जकत्वं स्वीकार्यम्। व्यक्तीनां जातिव्यञ्जकत्वे जातिव्यञ्जकतावच्छेदक- सामान्यान्तराभ्युपगमे स्वीकृते तत्र जातेर्वैय्यर्थ्यापत्या व्यञ्जकतावच्छेदकसामान्यं न स्वीक्रियते किन्तु गवादिव्यक्तिविशेषाणामेवाननुगतानां सास्नदिमत्त्वाद्युपाधिविशेषि-तानां वा गोत्वादिजातिव्यञ्जकत्वं नैयायिकैः स्वीक्रियते। एवमेव "सन् घटः सन् पटः" इत्यनुगतप्रतीत्या द्रव्यदित्रिषु सत्ताख्या परा जाति; द्रव्यत्वादिजातयश्च नैयायिकैः स्वीक्रियन्ते । वेदान्ते तु **"घटो यं,**

**घटोऽयमिति" "घटः सन्, पटः सन्"** इति चानुगतप्रतीतिः **"घटावच्छिन्नं सद्"** एव विषयीकरोतीति स्वीक्रियते। तद्व्यञ्जकत्वं व्यक्तिविशेषाणामेवाननुगतानां सास्नादिम-त्वाद्युपाध्यनुगतानां वेति स्वीक्रियते। व्यक्तिविशेषादीनां जातिव्यंजकत्वकल्पनन्तु नैयायिकानां वेदान्तिनां च मतयोः समानम्। नैयायिकानां गोत्वाद्यनेकजातीनां कल्पनन्त्वधिकम्। वेदान्ते तु क्लृप्तं सदभिन्नं बह्मचैतन्यमेव पराभिमतजातीनां स्वरूपमिति लाघवम् । तस्मात् सदभिन्नं ब्रह्मैव घटोपहितं घटत्वमिति, द्रव्योपहितं द्रव्यत्वमिति च व्यपदिशयते इति वेदान्तिनां राद्धान्तो विराजते। तदुक्तं वार्तिक **"सत्तत्त्वं सर्वभावानामिति।"[5]** वेदान्ते तु सद्रूपं चैतन्यमेव सत्ता, सत्तायामेव घटादयः कल्पिताः न तु सत्ता घटादिष्वतिरिक्ता जातिरिति स्वीक्रियते। सत्तेत्यत्र तद्धितप्रत्ययः स्वार्थे, प्रकृत्यर्थसदेव सत्तापदबोध्यमिति न दोषः। वार्तिक एव दर्शितम्-

**प्रकृत्यर्थातिरेकेण प्रत्ययार्थो न गम्यते।**
**सत्तेत्यत्र ततः स्वार्थस्तद्धिताऽत्र भवन्भवेत् ।। इति ।।[6]**

एवं च वेदान्तेऽपिऽजातीनां स्वरूपापलापो नास्ति किन्तु सद्रूपत्वन्तासामिति सिद्धम्। जातीनामविद्याशक्तिविशेषरूपत्व-मित्यपि द्वितीयपक्ष आकग्रन्थेषु प्रतिपादितः। अथ तादृशाविद्याया घटद्यवच्छिन्नचिद्विषयकत्वे घटादिधीकाले तन्निवृत्यापत्ति; ब्रह्मा-विद्या नानेति सिद्धान्त इति वाच्यम्। उच्यते- अविद्यायाः शक्तत्यो द्विविधा, आवरणशक्तय; विक्षेपशक्तयश्चेति। तत्रावरणशक्तत्य एव सविषयिकाः न तु विक्षेपशक्तयः। जातीनान्तु अविद्यायाः विक्षेपशक्तिरूपत्वमङ्गीक्रियते इत्यदोषः। अविद्यायाः कार्यजन-नानुकूलाः विक्षेपनामकशक्तयोऽनन्ताः। तथा च घटव्यक्तिभिर-वच्छिन्ना जलाहरणादिकार्यानुकूला तादृशशक्तिः घटत्वम्। एवं पटत्त्वादिकमपीति सर्वमुपपद्यते। सैव आविद्यकजातिरित्युच्यते। **"शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्यामि"** तिसूत्रभाष्ये भाष्यकारैरैतादृशाविद्यकजातिमभिप्रेत्यैव "आकृति" पदं प्रयुक्तम्। तत्रस्थभाष्यम्- **"द्रव्यगुणकर्मणां हि व्यक्तय"** एवोत्पद्यन्ते, नाकृतयः। **"आकृतिभिश्च शब्दानां सम्बन्धः न व्यक्तिभिः"** इति। जातिलक्षणं च भाष्यव्याख्यातृभिः चित्सुखाद्याचार्यैः **"अनेकत्र कात्स्येंन वर्तमाना जातिः"** इति दशितिम् । न च लक्षणमेतत् सुवर्णादिष्वतिव्याप्तमिति वाच्यम्, सुर्वणादिद्रव्याणां कुण्डलादिषु क्रमभाविष्ववयवापचयादि-सम्भवान्न कात्स्येंनानुवृत्तिरस्तीति नातिव्याप्तिः तथा चास्मिन् पक्षेऽपि सर्वमुपपद्यते। अत्र च सम्भावितदूषणकदम्बकं भूषणमेवा-विद्यकत्वात्। एवं जातीनां सद्रूपत्वमिति, अविद्याशक्तिविशेषरूपत् वमिति च पक्षद्वयं वेदान्तिभिर्यत् प्रतिपादितन्तदुभयमपि सङ्गच्छते। उभयथापि वेदान्ते जातिस्वरूपापलापो न क्रियते इत्यतः विधिरूपा जातिरेव शब्दगम्याा नापोहः शब्दार्थः इति सिद्धम्। वेदान्तपरि-भाषाकारैश्च यदुक्तं- **"जातित्वोपाधित्वपरिभाषायाः सकलप्रमाणा-गोचरतयाऽप्रामाणिकत्वाद्"** इति तत्तु न जातिस्वरूपनिराकरणपरं किन्तु नैयायिकाद्यभिमतरीत्या जातेः पदार्थान्तरत्वस्य नित्यत्वे सत्यनेकसमवेतत्वादिलक्षणस्य च निराकरणपरम्। अन्यथा परिभाषायामेवाग्रे आगमपरिच्छेदे **"शक्तिविषयत्वं शक्यत्वं तच्च जातेरेव न व्यक्तेः"** इति यदुक्तं तन्त्र सङ्गच्छेत । तथा च जातिस्वरूपस्वीकारे परिभाषाग्रन्थविरोधोऽपि नास्ति। एतादृशी जातिरेव शब्दार्थः नापोहः।

**पाद टिप्पणी**

1 न्यायमञ्जरी

2 न्यायसरे पृष्टे १९९, मध्ये।

3 श्लोकवार्तिकम्

4 तदुक्तमुदयनाचार्यै :- अर्थेनैव विशेषोऽयं निराकारतया धिया इति ।

5 बृह.वा.पृ.सं.११०६

6 बृह.वा. पृ.सं.११०७